# कालिदासस्य पर्यावरणसंरक्षणदृष्टिः

**Shivram Sharma**
Department of Musicology, Banaras Hindu University, Varanasi-5

**Abstract**

*Environmental pollution is one of the major problems of this modern era. Science and Law both are failing to protect environment. The possible remedies for this problem could only be our own eternal vigilance and combined efforts of all. That eternal vigilane can be brought into ourselves only through the enlightenment of education and our own sense of responsibility.*

*Indian ancient scholars knew the importance of environment from the very beginning. In the Vedic Literature they tried to spiritualize all the aspects of the environment to ensure its protection. Specially sanskrit poets emphasised on it. They described the natural beauty in such a way that inspires us towards its protection.*

*Kalidas is the most prominent poet among them. He was the real lover of nature. Being a poet, he do not preach us in a scientific way but his way of inspiring us is through his poetry.*

*By relating literature of Kalidas with Environmental Science we will try to bring out some interesting facts regarding the topic of this essay.*

साम्प्रतं जगति मानवानां समस्ता भौतिकव्यवहारा विज्ञानमाश्रित्य प्रवर्तन्ते। विज्ञाननिष्पादितं व्यवहारोपयोगिवस्तुजातमुपलभ्यापि सन्तोषविहीना भूमिवासिनः सततं नवनवानुपभोग्यपदार्थानुत्पादयितुं प्रयतन्ते। सर्वत्र चर्चा प्रचलति यद्विज्ञानमाश्रित्यानुसन्धाय च जगद्विकसति किन्तु ऐकाङ्गिकेयं विकासप्रक्रिया वस्तुतो विनाशोन्मुखी प्रतिभाति। अद्य अनवरतमनेकवैज्ञानिकोपायानवलम्ब्य भोग्यपदार्थोत्पादनपृथुलां केवलां भौतिकीं समृद्धिं भजमाना लोकोऽकल्पितपूर्वाभिरनेकाभिस्तादृशीभिः जटिलसमस्याभिः ग्रस्तो वर्तते यासां निवारणाय यदि सद्यः प्रयासा न क्रियन्ते, तदा सर्वोऽप्ययं विकासो विनाशमेवोपजनयिष्यति। समस्यास्वासु भूवलये जीवानां जीवनमेव संशये निपातयन्ती, सार्वभौमा पर्यावरणप्रदूषणात्मिका काचिज्जटिला समस्या जागर्ति। अस्याः समाधाने वैज्ञानिकाः शासका अन्ये च जागरूकाः जनाः सन्नद्धतामुपयान्ति, विधीयन्ते चानेके विज्ञानसम्मता उपायाः किन्तु नाद्यावधिरुपायः कोऽपि तादृशः कल्पितो यमवलम्ब्य पर्यावरणक्षरणनिवारणे, संजातक्षतिपूरणे, संरक्षणे च साफल्यं लभ्येत।

विश्वगुरुमस्माकं भारतीयानां पर्यावरणप्रदूषणनिवारणे सविशेषा भूमिका भवितुमर्हति। भारतीया हि संस्कृतिः, सभ्यता जीवनयापनपद्धतिश्च सर्वथा पर्यावरणस्यानुकूलतामाकलय्य विस्तृतिमुपयातासीत्, अतोऽस्माकं वेदवेदाङ्गशास्त्रपुराणकाव्येषु प्रतिपादितान् सामाजिकराजनैतिकविचारान्, लौकिकाध्यात्मिकसिद्धान्तान्, मानवीयलोकव्यवहारान् बाह्याभ्यन्तरधार्मिकाचारांश्च समीक्ष्य पर्यावरणसंरक्षणोद्योगः सफलः भवितुमर्हति। निबन्धेऽस्मिन् कविकुलगुरोः महाकवेः कालिदासस्य काव्यान्यनुशीलस्य तस्य पर्यावरणसंरक्षणदृगुन्मीलनं विधीयते।

तत्रादौ पर्यावरणस्वरूपं सृष्टिप्रक्रियायां तस्य महत्वं, जायमानां क्षतिं, क्षतेः मानवेष्वन्यजीवेषु प्रभावाकलनं विधाय पश्चात् कालिदासप्रदिष्टं समाधानमुपस्थापयिष्यते।

परि आ इत्युपसर्गद्वयपूर्वकात् वृधातोर्निष्पन्नोऽयं पर्यावरणशब्दः भूमण्डले जीवजगति च विद्यमानं तत् समस्तं पदार्थजातमभिदधाति येनावृत्तं यदुपकरणकञ्च भुवि जीवनं सम्भवति। भूम्यादीनि पञ्चमहाभूतानि, वृक्षवनस्पतयः, सर्वे चराचरजीवा अन्ये च भुवि विद्यमानाः पदार्थाः पर्यावरणं संरचयन्ति, परस्परसापेक्षतया च स्वस्वदायित्वं निर्वहन्ति। साम्प्रतं प्रकृतिनियान्त्रितेयं पर्यावरणव्यवस्था विज्ञानेनव्याहता सती क्षीयते। विज्ञानोत्पादिता यन्त्रविशेषास्तैरुत्पादितानि उपभोगवस्तूनि, आयुधानि, यन्त्रोत्सृष्टानि प्रदूषितरसायनानि, प्राकृति संसाधनानभविचारितोपयोगः वनस्पतिच्छेदनं खनिजेन्धनस्य चात्यधिकोपयोगः पर्यावरणविनाशे हेतुतामुपयान्ति। भारतीयदृष्ट्या पर्यावरणविनाशहेतवो विचार्यन्ते चेद् धर्महीनता, भोगलिप्सा, कर्महीनता, आलस्यम् अर्थकाममात्रोपार्जनपरा मानवीया प्रवृत्तिश्च प्रमुखा हेतवो वर्तन्ते।

अधुना खनिजपदार्थोपलब्ध्यै विदार्यमाणा उद्योगोपयोगायोच्छिद्यमानवनस्पतिविहीना, अधिकान्नोत्पादनाय च विविध-रासायनिकोर्वरकप्रयोगान्नीरसतामादधाना वसुन्धरा पर्यावरणदृष्ट्या-त्यन्तशोचनीयां दशामुपगतास्ति। जीवनाधारभूतं कूपतडागस्रोतः सरित्सागरेषु विद्यमानं जलमपि रसायनैः मानवोत्सृष्टैः दूषितपदार्थैश्च तथा प्रदुष्टं सञ्जातं यथा पानीयतामपि जहाति। प्राणाधारभूतस्य वायोः स्थितिः सर्वाधिकशोचनीयतामावहति। अपद्रव्यप्रज्वलनजन्यधूम-सम्भिन्नो गैसपदवाच्यैर्विषाक्तैर्द्रव्यैर्विदूषितो वायुः श्वसनक्रियायोग्योऽपि नास्ति। मानवातिक्रान्तानि वनानि, वनचरा जीवाश्च निरन्तरं क्षीणतां यान्ति। फलतः प्रदूषितपर्यावरणप्रभावितं प्राकृतिकम् ऋतुचक्रमपि नियतिनियमान् व्यतिक्रम्य प्रवर्तते। अवर्षणातिवर्षणभूकम्पशम्पानिपातचक्रवातादिप्रकुप्तप्रकृतिप्रभावविशेषा अशेषे भूमण्डले विलोक्यन्ते। भूतापोपचयात् सदा मर्यादापालको यादसांपतिरपि अतिक्रामत्यात्मीयां मर्यादाम्। भूध्रुवयोः हिमानीषु च सञ्चितं हिमं भूतापोपचयाद् द्रवत्वमापाद्य क्षीयते। एतान् सर्वान् पर्यावरणप्रदूषण-मनुजातान् विप्लवानाकलय्य भविष्यति भुवि जीवनमपि संशयारूढं भविष्यतीति वैज्ञानिकैरप्युच्यतेऽस्माभिरपि प्रत्यक्षैर्हेतुभिरनुमातुं शक्यते।

भारतीया मनीषिणः पर्यावरणस्य महत्वं सम्यगवगच्छन्ति स्म। सम्पूर्णे संस्कृतवाङ्मये वैदिकधर्ममाधृत्य वर्णिताः लोकव्यवहारा जीवनयापनपद्धतिश्च न कुत्रापि पर्यावरणप्रतिकूलतां भजति। विशेषतः महाकाव्येषु वर्णिते प्राच्यभारतीयसमाजे सर्वत्र कान्तासम्मितो-पदेशतया पर्यावरणसंरक्षणोपायाः शिक्षिताः सन्ति। अत्र संरक्षेपेण कालिदासकाव्येषु व्याकीर्णायाः पर्यावरणसंरक्षणशिक्षाया अनुशीलनं विधीयते।

अधीतवेदवेदाङ्गादिसकलसंस्कृतवाङ्मयः, आकलित-सकललितकलाकलापः, पर्यटिताशेषभूमण्डलः, आलोकिताखिल-प्राकृतिक्रियाकौतुकः, अनुभूतापरिमितभौतिकानन्दसन्दोहः, विदितसमस्तचराचरजीवव्यवहारः, दृष्टिगोचरीकृतसरित्समुद्र-शैलविपिनोद्यानपादपलतालङ्कृतवसुमतीसौन्दर्यः, आकर्णितशुक-पिकचकोरमयूरसारसहंसादिपत्त्रिकुलकलरवः कविकुलगुरुः कालिदासः सम्पूर्णां पर्यावरणप्रक्रियां सम्यगवगच्छन्ति स्म। सः पर्यावरणमहत्वप्रतिपादने तद्रक्षणप्रवृत्तिसंवर्धने च स्वाकाव्येषु यथावसरं सर्वजनहृद्यामुपदेशपरम्परां प्रस्तौति। तस्य समये विज्ञानविधिविस्तरो नासीदतः साम्प्रतमिव पर्यावरणप्रदूषणस्य कल्पनापि नासीत्। अतश्च कालिदासेन प्रभुसम्मिततया शाब्दः, सुहृत्सम्मिततया आर्थश्च पर्यावरणसंरक्षणोपदेशो न दत्तः किन्तु सः कान्तासम्मिततया सर्वत्रैव पर्यावरणमहत्वं प्रतिपादयन् तस्य संरक्षणाय लोकं प्रेरयति।

***पञ्चमहाभूतसंरक्षणे कालिदासस्य दृष्टिः***

भारतीयायां संस्कृतौ पृथिव्यादिपञ्चमहाभूतेषु देवत्वं प्रतिष्ठापितमस्ति। सम्पूर्णे संस्कृतवाङ्मये देवभावनया पञ्चभूतानां दर्शनपूजनसम्मानादीनामुपदेशो प्रदीयते। कालिदासोऽपि यथावसरमेतेषां देवरूपतां प्रतिष्ठाप्य महत्वमुपयोगिताञ्च व्याख्याय संरक्षणमपि निश्चिनोति। अभिज्ञानशाकुन्तलस्य मङ्गलपद्ये या सृष्टिः स्रष्टुराद्येत्यादौ[1] भूम्यादीनां परमेश्वरस्याष्टमूर्तित्वं व्यवस्थाप्य सः जनास्तान् प्रति प्रणतिप्रवणान् विदधाति, उन्मीलयति च कामपि पञ्चभूतसंरक्षणात्मिकां दृष्टिम्। धर्ममाश्रित्य न्यायपरायणस्य राज्ञो राष्ट्रे पञ्चभूतानि उत्कृष्टगुणवन्ति जायन्त[2] इति कालिदासवचनं पर्यावरणदृष्ट्या महत्वमावहति।

कालिदासस्य पृथिवीं प्रति देवताभावना सर्वत्रं जागर्ति। सः पृथिवीं जन्मभूमित्वेन मातृत्वेन जीवनदातृत्वेन राजभोग्यात्वेन च पश्यति।[3] तस्यां मातृवत् पूज्यतां, रक्षणीयतां क्वचिन्निर्दिशति, क्वचिच्च रमणीवद् रमणीयतामनुमोदयति।[4]

जलं जलाधारान् प्रति च कालिदासस्य जागर्ति महत्यनुरागभावना। तस्य काव्येषु सर्वत्र जलाशयानां रमणीयानि वर्णनान्युपलभ्यन्ते। अगाधजलाधारत्वात् अपरिमितजलजीव-परिपालकत्वात्, रत्नाकरत्वात्, महदाश्चर्यकारि स्वरूपत्वात्, जीवनदायकत्वाच्च समुद्रः कालिदासस्य प्रियतमो वर्ण्यविषयो वर्तते। रघुवंशस्य त्रयोदशसर्गे तेन राममुखात् समुद्रस्य यादृशं स्वरूपं माहात्म्यञ्च उपस्थापितं तदधीत्य कस्य सहृदयस्य स्वान्तं मोदाञ्चितं श्रद्धान्वितञ्च न भवति।[5]

मन्येऽत्र कालिदासः समुद्रस्य महिमानमुद्भाव्य पवित्रतां देववत्पूज्यताञ्च निर्दिश्य पर्यावरणदृष्ट्या तस्य निर्दूषणतां निर्मलताञ्चोदिशति।

सरितोऽस्माकं भारतीयानां संस्कृतौ जननीवत् पूज्यतां सेव्यताञ्चावहन्ति। धर्मदृष्ट्या नदीनां महत्वं देवतावद् वर्णितमस्ति प्रायः सर्वेष्वेव शास्त्रेषु। नदीषु देवीत्वकल्पनायाः पारमार्थिकं महत्वं त्वस्त्येव भौतिकमप्यस्ति परमरहस्यात्मकं महत्वम्। कृषिप्रधानस्यास्य समृद्धिः, अर्थव्यवस्था, सौन्दर्यं सुखञ्च नदीषु सन्निहितं विद्यते, अतः कालिदासः नदीनां वर्णने सर्वत्र प्रयत्नवान् विलोक्यते।

आवर्षं प्रवहत्पयःपूरपरिपूर्णानां तरङ्गदोलादोलज्जल-चराणां[6] सैकतनिषण्णमृगादिपशूनां[7] नदीनां सौन्दर्यं मानवोपकारिताञ्च व्याख्याय कालिदासः पर्यावरणतन्त्रे तासां महत्वमपि उद्घाटयत्येव। सः नदीः क्वचित् समदप्रमादारूपेण[8], अन्यत्र वियोगविधुरमेघ-प्रियारूपेण[9] इतरत्र च राज्ञः कीर्तिरूपेण[10] निरूपयति। रघुवंशेऽनेको-

Vijnana Bharati

पमालङ्कृतं गंगायमुनयोः समागमवर्णनं संस्कृतसाहित्ये परमां प्रतिष्ठामावहति।[११] कालिदासेनोपस्थापितेयं नदीसमागमसुषमा जनमानसे ताः प्रति प्रीतिं समादरसंरक्षणभावनाञ्चोत्पादयन्ती पर्यावरणसंरक्षणमपि निश्चनोति। अग्रे संगमस्यास्य धार्मिकं महत्वं प्रतिपादयता तेनैवोक्तम् –

समुद्रपल्योर्जलसन्निपाते पूतात्मनामत्र किलाभिषेकात् ।
तत्वावबोधेन विनापि भूयस्तनुत्यजां नास्ति शरीरबन्धः।।[१२]

पुनरग्रे सरयूनद्यां मातृत्वं प्रतिष्ठाप्यासौ जनान् श्रद्धान्वितान् विदधाति। एवं कालिदासः स्वकाव्येषु यथास्थलं नदीषु चेतनतां प्रतिष्ठाप्य, तासामनितरसाधारणीं मानवोपकारितां व्याख्याय सौन्दर्यसम्पच्चोद्घाट्य जनान् नदीसंरक्षणस्य कान्तासम्मितोदेशं ददात्येव।

सद्यः परमानन्दमास्वादयितुं प्रवृत्तायां कालिदास-काव्यधारायां प्रकृतिवर्णनस्य सर्वातिशायि महत्वं विद्यते। तस्य काव्येषु विस्तरेण वर्णिता वनवृक्षलतापर्वतादयः पर्यावरणदृष्ट्या-प्यौचित्यमावहन्ति यतो ह्येतानाधारीकृत्यैव जगतः पर्यावरणं व्यवतिष्ठते। प्रकृतिप्रियः कविः कालिदास तान् सर्वानपि पदार्थान् वर्णनविषयीचकार ये जडत्ववन्तोऽपि मानवानां हितं सम्पादयन्ति। कालिदास्य महदिदं वैशिष्ट्यं यत् सः जडपदार्थेष्वपि चेतनतामारोप्य काव्यसौन्दर्यं जनयति।

एतेन जडपदार्थारोपितचेतनवर्णनेन कविकुलगुरुः भेदेऽप्यमेदं व्यवस्थाप्य प्रकृतिमानवयोरैक्यं परस्परसापेक्षताञ्च सम्पादयति। मानवेतराणां प्राकृतिकपदार्थानां मानववद् व्यवहारयोग्यतां मानवोपकारपरायणताञ्चकलय्य भावकाः स्वभावत एव प्रकृतिविपरीतं तत्क्षयकारि कर्म स्वयं तु नैवाचरन्ति परानपि तस्मान्निवारयन्तीति कालिदासस्य महानयं पर्यावरणसंरक्षणोपक्रमो विज्ञातव्यः। कथ्यमिदं कतिपयैरुदाहरणैः प्रमाप्यते–

***कालिदासस्य पादपसंरक्षणदृष्टिः***

पर्यावरणदृष्ट्या सम्पूर्णस्यैव वनस्पतिजगतः संरक्षणमा-वश्यकमिति वैज्ञानिकैर्निर्णीतम्। कालिदासेन कार्यमिदं पूर्वमेघे परम चातुर्येणारब्धमासीत्। "प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्" इत्युक्तिं परिपालयता तेन स्वकाव्येषु वृक्षलतापर्वतादीनां सौन्दर्यमुद्भाव्य तत्प्रति मानवानुरागवृत्तेर्जागरणञ्च विधाय तद्विनाश-प्रवृत्तेरेवावरोधनं कृतम् । यथा शाकुन्तले पादपसेनचनतत्पराणां मुनिकन्याकानां वार्तायां समागतानि – "सखि! त्वत्तोऽपि तातकण्वस्य आश्रमवृक्षकाः प्रियतरा इति तर्कयामि, येन नवमालिकाकुसुमपेलवापि त्वमेतेषामालवालपूरणे नियुक्ता" एवं "सख्यौ एष वातेरितपल्ल-वाङ्गुलभिस्त्वरयतीव मां केसरवृक्षकः यावदेनं सम्भावयामि।" अथ च "अत्रैव तावन्मुहूर्तं तिष्ठ यावत् त्वयोपगतया लतासनाथ इवायं केसरवृक्षकः प्रतिभाति"[१३] इत्येतानि अन्यान्यापि वनस्पतिरामणीयकोद्भावकानि वाक्यान्यधीत्य को नाम सहृदयः स्वार्थाय वृक्षच्छेदायोद्यतो भविष्यति। इत्थञ्च पर्यावरणसुरक्षोपक्रमः स्वतः एव आरब्धो भविष्यति।

रघुवंशे देवदारुवृक्षरक्षणे शिवेन नियोजितस्य सिंहस्य "पुत्रीकृतोऽसौ वृषभध्वजेन, स्कन्दस्य मातुः पयसां रसज्ञः, अथैवमद्रेस्तनया शुशोच"[१४] इत्यादय उक्तयो न केवलं पार्वतीपरमेश्वरयोः देवदारुप्रियत्वं ख्यापयन्ति अपि तु मानवानपि वृक्षरक्षणाय प्रेरयन्ति।

कालिदासवर्णिता वृक्षलतादयः करणविहीना अपि पटुकरणा इव व्यवहरन्ति। शाकुन्तलस्य चतुर्थाङ्के ते शकुन्तलायै वसनाभरणानि यच्छन्ति।[१५] सर्वज्ञः कण्वोऽपि तान् शाकुन्तलामनुज्ञातुं प्रेरयन् तेषां पटुकरणतां समर्थयति।[१६] तनयामात्मानुरूपभर्तृसंगतां नवमालिकाञ्च चूतसंश्रितां विज्ञायासौ वीतचिन्तो महर्षिः लतातनययोस्तुल्यां प्रेमास्पदतां विज्ञाप्य लतापादपसंरक्षणस्य कमप्यपूर्वमेवोपदेश-मुपस्थापयति।

कालिदासस्य लताः क्वचिदावर्जितपल्लवाभिः शाखाभिः रामं मार्गं दर्शयन्ति।[१७] अन्यत्र स्तबकाभिनम्रामशोकलतां राम सीतात्वेन परिगृह्णाति।[१८] शरभङ्गाश्रमे मुनौ ब्रह्मलीने सति पादपा एव अतिथिसपर्यां सम्पादयन्ति।[१९] किं बहुना सर्वत्रैव कालिदासस्येमां सरणिमवलम्ब्य यदि सर्वे जना प्रकृतिं पश्येयुः अवगच्छेयुश्च वनस्पतीनां पादपानां प्रकृतिरामणीयकाधानसामर्थ्यं तदैतेषां संरक्षणस्यातिरिक्तः प्रयासो नैव कर्त्तव्यो भविष्यति।

***कालिदासस्य वन्यजीवसंरक्षणदृष्टिः***

पर्यावरणव्यवस्थायां मानवेतराणां पशुपक्षिप्राणिनां विद्यते महती भूमिका। एते पर्यावरणप्रक्रियायां परस्परमनुस्यूता इव परस्परस्योपकारका भवन्ति, एकस्य विनाशे सम्पूर्णा व्यवस्थैव भज्यते। कालिदासेनैतेषां रक्षणेऽपि विहितोऽस्ति सुमहान् प्रयासः। तत्साहित्येऽनेकस्थलेषु ललितकेलिशीलानां नैसर्गिकरमणीयक्रिया-कलापरचयतां गजसिंहमृगादिवन्यप्राणिनां वर्णनमस्ति। एतेषां वर्णनं पुरस्कृत्य सः संरक्षमेवावाभिलषति।

रघुवंशस्य द्वितीयसर्गे मुनिहोमधेनोः पुत्रप्रदानसमर्थायाः नन्दिन्याः दिलीपकृतसपर्यावर्णनं गवां महत्वं मानवोपकारित्वञ्च

Vijnana Bharati

व्याख्याय गोरक्षणोपदेशं ददाति।[२०] शाकुन्तले "न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्"[२१] इत्यादि दुष्यन्तं मृगवधान्निवारयत् तपस्विवाक्यं पशुवधनिवारणपरायणा सार्वभौमा विज्ञप्तिरेवास्तीति सहृदयैः स्वीकरणीयम्। पतिगृहगमनकालेऽवरोधितशकुन्तलामार्गः पुत्रकृतकः मृगपोतकः पशुमानवयोः तां निःस्वार्थ प्रेमपरम्परां स्थापयति यस्यां दृढायां सत्यां सर्वे वन्यप्राणिनः मानवानां निकट-सम्बन्धित्वमादधानाः संरक्षणीयतामायान्ति।[२२]

रघुवंशे स्वंवरं प्रति प्रस्थितो रघुकुमारः अजः नर्मदातीरे समागतं सेनानिवेशविध्वंसकमपि गजेन्द्रं न प्राणहरणेच्छया प्रहरति अपि केवलया निवर्तनेच्छयैव शनैः कुम्भे निहन्ति। तत्र "वन्यः करी नृपतेरवध्यः" इत्युक्त्वा कालिदासेन सर्वेषामेव वन्यप्राणिना-मवध्यत्वं स्थाप्य पर्यावरणसंरक्षस्य सूत्रपातः कृत आसीत्।

इत्थं परमधार्मिको दयादाक्षिण्यादिसकलशुभगुणाकरः कालिदासः कान्तासम्मितोपदेशतया क्वचिदर्थतः क्वचित् शब्दतः क्वचिच्च तात्पर्यतः सम्पूर्णस्यापि पर्यावरणप्रपञ्चस्य संरक्षणाय सहृदयान् प्रेरयति।

सम्प्रति कालिदासस्यायं सन्देशः अर्थकामोपार्जनपरायणैः, विज्ञानविज्ञतामेव विद्वत्तां प्रमाणयद्भिः, विलुप्तसौन्दर्या-वलोकनसामर्थ्यैः सद्भावरहितमानसैः, पर्यावरणरहस्यमजानद्भिः आधुनिकैः सम्यग् भावनीयः। वस्तुतस्तु मानवानां यावदन्तकर-प्रदूषणनिवारणं न भविष्यति तावद् बाह्यप्रदूषणनिवृत्तिरसम्भवैव प्रतिभाति। कामक्रोधलोभमोहमदमात्सर्यादीनां हृद्गतानां दूषणानां निवारणं विना पर्यावरणदोषनिवारणमसम्भवमेवास्ति। पर्यावरणप्रदूषणं मानवानां भोगलिप्सास्वार्थादिभिरेवोत्पन्नमस्ति अतः कालिदाससाहित्ये वर्णितान् त्यागतपोदानसदाचारादिसद्गुणानात्मन्याधाय जगति मानवाः जीवनयापनं करिष्यन्ति चेज्जगदिदं निरापदं स्थास्यति। नो चेदलं व्यर्थैः प्रयासैः तैलाभ्यङ्गेन राजयक्ष्मानिवारणं न भवति।

***सन्दर्भः***


१. शाकुन्तले - १-१

२. रघुवंशे - ४-७

३. रघुवंशे - ३-४

४. रघुवंशे - ४-११

५. रघुवंशे - १३/२-१४

६. ऋतुसंहार - वर्षावर्णने - ८

७. ऋतुसंहार - शरद्वर्णने - ३

८. शाकुन्तले ६/५

९. मेघदूते पूर्वमेघे - २८, २९, ४०, ४१

१०. मेघदूते पूर्वमेघे - ४५

११. रघु. १३/५४-५७

१२. रघु. १३/५८

१३. अभि.शाकु. १/१

१४. रघु. २/३६, ३७

१५. शाकुन्तले ४/५

१६. शाकुन्तले ४/९

१७. रघु. १३/२४

१८. रघु. १३/३२

१९. रघु. १३/४६

२०. रघु. २/१-२५

२१. शाकु. १/१०

२२. शाकुन्तले ४/१४

२३. रघु. ५/५०


Vijnana Bharati